# केन्द्रीयसंस्कृतविवविद्यालयस्य

## एकलव्यपरिरः

**आचार्यप्रथमवर्षः**

**अभ्यासप्रश्नोत्तराणि**

प्र.1 - व्यक्तिरेव नामार्थ इति पक्षे किं प्रमाणम् ?

उ- .केवलव्यक्तिपक्षे एव अण्ग्रहणस्य एकशेषस्य चारम्भेन व्यक्तिपक्षस्यापि शास्त्रप्रमाणत्वात् ।

प्र.2-. जातिविशिष्टव्यक्तिः नामार्थ इति पक्षे किं प्रमाणम् ?

उ -. नहि आकृतिपदार्थस्य द्रव्यं न पदार्थ इति भाष्यमेव मानम्।

प्र.3 - .त्रिकं नामार्थ इति पक्षे त्रिकशब्देन किं गृह्यते ?

उ.- जातिव्यक्तिलिङ्गानि ।

प्र.4- किं नाम नपुंसकत्वम् ?

उत्तर -.सत्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम् ।

प्र.5. लिङ्गं कस्यार्थः? प्रत्ययस्य प्रकृतेः वा ?

उ. - प्रकृत्यर्थः ।

प्र.6. सुपां सुपा इति कारिकां प्रपूरयत ?

उ . सुपां–सुपा तिङा- नाम्ना धातुनाथ तिङां तिङा ॥

सुबन्तेनेति च विज्ञेयः समासः षड्विधो बुधैः ॥ २८ ॥

प्र.7. जहतस्वार्थाशब्दस्य का व्युत्पत्तिः ?

उ-. जहति पदानि स्वार्थं यस्यां सा जहतस्वार्था ।

प्र.9. वैयाकरणैः समासादिवृत्तिषु किदृशं सामर्थ्यं स्वीक्रियते ?

उ-. एकार्थीभावरूपं सामर्थ्यम् ।

प्र.10 .एकार्थीभावस्य किं लक्षणम् ?

उ-. पृथक्पृथक् अर्थोपस्थापकानां पदानां समुदायशक्त्या विशिष्टार्थबोधकत्वं एकार्थीभावत्वम्।

प्र.11. वाक्ये किदृशं सामर्थ्यं भवति ?

उ. - व्यपेक्षारूपसामर्थ्यम्।

प्र. -12 व्यपेक्षारूपसामर्थ्यस्य किं लक्षणम् ?

उ.-स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् यः परस्परसम्बन्धः सा व्यपेक्षा।

प्र.12 .अजहत्स्वार्थापदस्य कः विग्रहः ?

उ- न जहति पदानि स्वार्थं यस्यां वृत्तौ सा

अजहत्स्वार्था।

प्र.14. भेदशब्देन किं गृह्यते ?

उ. भेदशब्देन अन्योन्याभावः गृह्यते।

प्र.15. भेदस्य वाच्यत्वे राजपुरुषः इत्यतः कीदृशः बोधः ?

उ. अराजकीयभिन्नः पुरुषः।

प्र.16 .भेदस्य अवाच्यत्वे कः दोषः ?

उ. राजपुरुषः सुन्दरः इतिवत् राजपुरुषः देवदत्तस्य चेति प्रयोगापत्तिः।

प्र.17. समासस्य भेदसंसर्गे उभयवाच्यत्वे राजपुरुष इत्यस्मात् कीदृशः बोधः ?

उ .राजकीयाभिन्नो राजसम्बंधवान् चायम्।

प्र.18. पदोद्देश्यकविधित्वं कुत्र अस्ति ?

उ.-कृत्तध्दितसमासैकशेषसनाद्यन्तधातुरूपाषु पञ्चस्वपि वृत्तिषु अस्ति।

प्र.19 .के वृत्तिधर्माः ?

उ- विशेषणलिङ्गसंख्याद्यः।

प्र.20. अर्थैः शब्दानां सम्बन्धः कीदृशः ?

उ.- अनादिः।

प्र.21 -कौण्डभट्टमते शक्तिस्वरूपं कीदृशम् ?

उ.- बोधजनकत्वरूपम् ।

प्र.22.- अपभ्रंशेषु शक्तिरस्ति न वा ?

उ.- अस्ति।

प्र.23.- किं नाम साधुत्वम् ?

उ .- पुण्यजननयोग्यत्वम् ।

प्र.24 -किं नाम असाधुत्वम् ?

उ.- पापजननयोग्यत्वम् ।

प्र.25- नञ्समासे कस्य प्राधान्यम् ?

उ - .पूर्वपदार्थस्य प्राधान्यम् ।

प्र.26.- नञ्द्योत्वं किम् ?

उ.- आरोपितत्वं नञद्योत्वम् ।

प्र.27 -के नञर्थाः ?

उ. तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।

अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रक्रीर्तिताः ॥

प्र.28.- प्रादयः वाचकाः द्योतकाः वा ?

उ- .प्रादयः द्योतकाः ।

प्र.29 .चादयः तथा चनिपाताः द्योतकाः वाचकाः वा ?

उ.- द्योतकाः ।

प्र.30-.किं नाम द्योतकत्वम् ?

उ.- स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वम् ।

प्र.31- कृत्तद्धितसमासेभ्यः जायमानः भावप्रत्ययेन किं अविधीयते ?

उ. संबन्धः ।

प्र.32.''सास्यदेवता'' इति सूत्रे अण् प्रत्ययार्थः कः ?

उ-  .देवताविशिष्टं देयं प्रत्ययार्थः ।

प्र.33. वृत्तौ किदृशिसंख्या भासते ?

उ. अव्यदैकत्व संख्या।

प्र.34- .तुमादयः कस्मिन् अर्थे भवन्ति ?

उ-  .भावे।

प्र.35.- कतिस्फोटाः ?

उ.- अष्टौ स्फोटाः।

1-वर्ण स्फोटः

2-पद स्फोटः

3-वाक्य स्फोटः

4-वर्णजाति स्फोटः

5-पदजाति स्फोटः ,

6-वाक्यजाति स्फोटः

7-अखण्ड पदस्फोटः

8- अखण्ड वाक्यस्फोटः।

प्र.36.- कः मुख्य स्फोटः ?

उ.- वाक्यस्फोटः।

प्र.37. स्फोटस्य किं लक्षणम् ?

उ. स्फुटति अर्थो यस्मात् असौ स्फोटः।

प्र.38 .वर्ण स्फोट इत्यनेन कः अर्थः विवक्षितः ?

उ. प्रकृतिप्रत्ययौ वाचकौ।

प्र39. आदेशानां वाचकत्वे कः स्फोटः सिद्धः ?

उ  .पद स्फोटः।

प्र.40 .वाक्यार्थे शक्ति अभ्युपगम्ये कः स्फोटः ?

उ. वाक्य स्फोटः ।

प्र.41. वृद्धव्यवहारेण प्रथमं कुत्र शक्ति गृहः ?

उ. वाक्ये ।

प्र.42. पदे न वर्णाः विद्यन्ते इति कारिकां पुरयत ?

उ.  पदे न वर्णाः विद्यन्ते वाक्येष्वयवा न च ।

वाक्यात् पदानामत्यन्तो प्रविवेको न कश्चन् ।।

प्र.43. किं नाम उच्चारितत्वम् ?

उ. ताल्वोष्ठ संयोगादिजन्यभिव्यक्तिविशिष्टत्वम् ।

प्र.44 .कः जाति स्फोटः ?

उ. अनेक व्यक्ति अभिव्यंग्य जाति स्फोट इति स्मृतः ।

प्र.45 – के तिङर्थः?

उ.- कर्तृकर्मसंख्याकालाः तिङर्थः

प्र.-46 प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधः केषां मते ?

उ.- नैयायिकानां नये।

प्र.47- कर्तृकर्मणोराख्यातार्थत्वे किं प्रमाणम् ?

उ.- कर्तृकर्मणोराख्यातार्थत्वे लः कर्म्मणि च भावे चाकर्मकेभ्यः सूत्रमेव मानम् ।

प्र.- 48 तिङर्थकालस्य कुत्रान्वयः ?

उ.- व्यापारे।

प्र.- 49 भावनाया अवाच्यत्वे को दोषः?

उ.- भावनाया अवाच्यत्वे धातूनाम सकर्मकत्वाकर्मकत्वविभाग उच्छिन्नः स्यात्।

प्र.50- ईप्सितं कर्म कतिविधं कानि च तानि ?

उ.- ईप्सितं कर्म त्रिविधं ,निर्वत्त्यम्, विकार्यम् प्राप्यञ्च।